# Surya Stuti Kashyapakrita

# કશ્યપકૃતા સૂર્યસ્તુતિઃ

## Document Information

Text title : Surya Stuti Kashyapakrita

File name : sUryastutiHkashyapakRRitA.itx

Category : navagraha, mudgalapurANa, stuti

Location : doc_z_misc_navagraha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 2 | 3.2. 7-21||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# કશ્યપકૃતા સૂર્યસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
કશ્યપ ઉવાચ ।
નમસ્તે જગદાધાર આત્મને પરમાત્મને ।
સૂર્યાય ત્રિવિધાયૈવ ત્રિકાલજ્ઞાય તે નમઃ ॥ ૭॥
ભેદાભેદવિહીનાય નાનાભેદધરાય તે ।
અનાકારાય દેવાય શાશ્વતાય નમો નમઃ ॥ ૮॥
અમેયશક્તયે તુભ્યં કર્માધારાય ભાનવે ।
સર્વકર્મમયાયૈવ ત્રિરૂપાય નમો નમઃ ॥ ૯॥
અમૃતાય સદા બ્રહ્મનિષ્ઠાય ત્વન્તરાત્મને ।
અર્યમ્ણે રવયે ચૈવ હરિદશ્વાય તે નમઃ ॥ ૧૦॥
આદિમધ્યાન્તહીનાય તદાધારાય તે નમઃ ।
અનન્તવિભવાયૈવ તેજોરાશે નમો નમઃ ॥ ૧૧॥
દીનનાથાય સર્વાય દિનાનાં પતયે નમઃ ।
નમો હન્ત્રે સ્વભક્તાનાં પાલકાય નમો નમઃ ॥ ૧૨॥
ભુક્તિમુક્તિપ્રદાયૈવ નાનાખેલકરાય ચ ।
નમો નમઃ પરેશાય પુરુષાય દિવસ્પતે ॥ ૧૩॥
એકસ્મૈ ચાદ્વિતીયાય માયાધારાય માયિને ।
સંજ્ઞાપતે નમસ્તુભ્યં રક્ષ માં શરણાગતમ્ ॥ ૧૪॥
આત્માકારં ચ સર્વત્ર કિં સ્તૌમિ ત્વાં દિવાકરમ્ ।
સમર્થા નાભવન્ વેદા અતસ્ત્વાં પ્રણમામહે ॥ ૧૫॥
દેહિ મે પરમેશાન ભક્તિં તે ચરણામ્બુજે ।
અન્યં વરં યયાચેઽહં ત્વં મે પુત્રો ભવ પ્રભો ॥ ૧૬॥
(ફલશ્રુતિઃ)
સૂર્ય ઉવાચ ।
એવં વદન્તમાનન્દયુક્તં મુનિવરં દ્વિજાઃ ।

અવદં તં પ્રસન્નોઽહં ભાવયુક્તં તપસ્વિનમ્ ॥ ૧૭॥
તવ પુત્રો ભવિષ્યામિ દ્વાદશાદિત્યરૂપવાન્ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામુને ॥ ૧૮॥
યદ્યદિચ્છસિ વિપ્રેન્દ્ર તત્તત્તે સફલં ભવેત્ ।
ભવામિ સ્મરણેનાઽહં પ્રત્યક્ષસ્તે પુરો મુને ॥ ૧૯॥
ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
ભુક્તિં મુક્તિં પ્રદાસ્યામિ મુને સ્તોત્રેણ તોષિતઃ ॥ ૨૦॥
એવમુક્ત્વા વાલખિલ્યાઃ સૌરલોકે ગતોઽભવમ્ ।
અન્તર્ધાય સ્વમાત્માનં સોઽપિ સમ્મુદિતોઽભવત્ ॥ ૨૧॥

ઇતિ કશ્યપકૃતા સૂર્યસ્તુતિઃ સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૨ । ૩.૨। ૭-૨૧॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 2 . 3.2. 7-21..

Proofread by Yash Khasbage, Preeti Bhandare

*Surya Stuti Kashyapakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*